सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥ (गो. ब्रा. १.१.२६)

## तद्धितश्चासर्वविभक्तिः । (३८/४४८)

तद्धितान्तः [1]शब्दोऽसर्वविभक्तिः[2] अव्ययसञ्ज्ञो भवति । यस्मान्[3] न सर्वविभक्तेरुत्पत्तिः सोऽसर्वविभक्तिः । ततः, यतः, तत्र, यत्र, तदा, यदा, सर्वदा, सदा[4] । तद्धितः इति किम् ? एकः, द्वौ, बहवः । असर्वविभक्तिः[5] इति किम् ? औपगवः[6], औपगवौ, औपगवाः ॥

## कृन्मेजन्तः । (३९/४४९)

कृद् यो मकारान्तः[7], एजन्तश्च तदन्तं शब्दरूपमव्ययसञ्ज्ञं भवति । स्वादुङ्कारं[8] भुङ्क्ते । सम्पन्नङ्कारं भुङ्क्ते[9] । लवणङ्कारं भुङ्क्ते[10] । एजन्तः–वक्षे रायः । ता वामेषे रथानाम् (ऋ. ५.६६.३) । क्रत्वे दक्षाय जीवसे (ऋ. १०.५७.४) । ज्योक् च सूर्यं दृशे (ऋ. १०.५७.४) । वक्षे इति वचेः 'तुमर्थे सेसेनसे°[11]' (३.४.९/३४३६) इति सेप्रत्यये [12]कुत्वे षत्वे च कृते रूपम् । एषे इति इणः सेप्रत्यये गुणे षत्वे च[13] कृते रूपम् । जीवसे इति जीवेः असे प्रत्यये[14] रूपम् । दृशे इति दृशेः केन्प्रत्ययो निपात्यते–'[15]दृशे विख्ये च' (३.४.११/३४३८) इति । अन्तग्रहणमौपदेशिकप्रतिपत्त्यर्थम्[16] । इह मा भूत्–आधये, चिकीर्षवे, कुम्भकारेभ्यः इति ॥

## क्त्वातोसुन्कसुनः । (४०/४५०)

क्त्वा, तोसुन्, कसुन् इत्येवमन्तं शब्दरूपमव्ययसञ्ज्ञं भवति । कृत्वा । हृत्वा[17] । तोसुन्––'(व्युष्टायां) पुरा सूर्यस्योदेतो[18]राधेयः' (का.सं. ८.३) । [19]'पुरा वत्सानामपाकर्त्तोः' (का.सं. ३१.१५) । 'भावलक्षणे स्थेण्कृञ्वदि°' (३.४.१६/३४४३) इति इणः, कृञश्च तोसुन् [20]प्रत्ययः । कसुन्–––'सृपितृदोः कसुन्' (३.४.१७/३४४४) । 'पुरा क्रूरस्य विसृपो विरप्शिन्' (तै. सं. १.१.९.३) । 'पुरा जत्रुभ्य[21] आतृदः' (ऋ. ८.१.१२) ॥

## अव्ययीभावश्च । (४१/४५१)

[22]अव्ययीभावसमासोऽव्ययसञ्ज्ञो भवति । [23]किं प्रयोजनम् ? लुङ्मुखस्वरोपचाराः । लुक् (२.४.८२/४२२)- उपाग्नि, प्रत्यग्नि शलभाः[24] पतन्ति । मुखस्वरः–उपाग्निमुखः, [25]प्रत्यग्निमुखः । 'मुखं स्वाङ्गम्'[26] (६.२.१६७/३९०१) इत्युत्तरपदान्तोदात्तत्वं प्राप्तम्, '[27]नाव्ययदिक्शब्द°' (६.२.१६८/३९०२) इति[28]प्रतिषिध्यते । तस्मिन्

1. तद्धितान्तशब्देषु अ. ब. 2. विभक्तियुक्तो ब. ह, विभक्तियुक्ते अ. 3. सर्वा विभक्तिर्नोत्पद्यते ग. फ. ह, न सर्वा विभक्तिरुत्पद्यते ड. 4. सदा नास्ति क. फ., कदा ड. 5. विभक्तियुक्ता फ. 6. औपगवः नास्ति फ. 7. माकारान्तं ड. 8. स्वांकारं फ. 9-10. भुङ्क्ते नास्ति क. ड. 11. असेन्––इति से प्रत्यये नास्ति फ. 12. चोः कुः (८.२.६०/३७८) क. ड. 13. च नास्ति फ, षत्वे नास्ति ई. 14. इदं ग, असेन् प्रत्यये अ. क. ड. फ, जीवेरसुन् प्रत्यये ह, असे प्रत्यये कृते अ, असे प्रत्यये विहिते ग. 15. दृश्ये क. 16. औपदेशिकार्थम् ह. 17. हत्वा अ. 18. नाधेयः ब.ई. 19. अमावास्यायाम् इत्यधिकम् अ. 20. प्रत्ययः नास्ति क. 21. जर्तृभ्यः मुद्रितः पाठः, आहतः ह. 22. अव्ययीभावश्च क. ग. ड. ह. ई. 23. किं प्रयोजनम् नास्ति क. 24. शलभा नास्ति क. फ. ह. 25. प्रत्यग्निमुखम् ग. फ. ह. 26. उच्यते इत्यधिकम् क. 27. वाव्यय ग. 28. इत्यादिना फ.